संस्कार
सं.नं. ७३

याज्ञिक
विधी:

चाकाचीस्थापनविधी:

३७८

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1) श्रीगणेशाय नमः। अथ नृसिंहपरिचर्यायुक्तम् चलाचौस्थापनविधि
रुच्यते। कुंडमंडपादिनावश्यकं। यजमानः कृतस्नातः कृतनित्यक्रियो देशा
काले च तत्तत्फलसिद्ध्यो। चितोत्तसंकीर्तनपूर्वकं तद्देवताप्रीत्यद्दृश्यकं अस्यां मू
र्तौ देवतासान्निध्यार्थं दीर्घायुर्लक्ष्मीसर्वकामसमृद्ध्यक्षय्यसुखकामोऽमुक
मूर्त्तिप्रतिष्ठां करिष्ये इति संकल्प्य नदंगत्वेन स्वगृह्योक्तरीत्या गणपतिपूजना
दिनांदीश्राद्धांतं कृत्वाऽऽचार्यमेव वृणुयात्। तत्राप्यशक्तः स्वयमेव कुर्यात्। आचा
र्यः अग्निः सप्तिमिति मंत्रचस्य सूक्तस्य वैश्वानरोऽग्निस्त्रिष्टुप्। अग्न्युत्तारणे विनि०
अग्निः ~~सप्तिमिति~~ पदरहितेन चाग्निः स[illegible]मिति सूक्तेनाग्न्युत्तारणं कृत्वा ऋत्विग्भिः स
सहाचार्य एवमष्टोत्तरसहस्रमष्टशतमष्टाविंशतिरष्टौ वा पठन् जलं पातयेत्॥ य
दत्रसंस्थितमिति श्वेतसर्षपान्विकीर्य शुचीवइतित्व्चेन पंचगव्येनापोहिष्ठेति कुशो
दकेन देवयजनाख्यभूमिं प्रोक्ष्य स्वस्थमनं तार्क्ष्यमिति मंत्रद्वयेन संप्रार्थ्य देवा आयां
तु यातुधाना अपयांतु विष्णो देवयजनं रक्षस्वेति भूमौ प्रादेशांकृत्वा स्थंडिलेग्निं प्रति

(2)

अष्टोत्तरसहस्रसंख्याभिरष्टोत्तरशतसंख्याकाभिरष्टाविंशतिसंख्याकाभिरष्टाष्टसंख्याकाभिर्वा तैर्हुता
इतिद्वियापंक्तिभौ

चलार्चा ष्ठाप्याश्वलायनयजमानेऽन्वादध्यात्। चक्षुषीआज्येनेत्यंतमुक्त्वास्थापितदेवममुं
समिदाज्यचरुतिलाहुतिभिः प्रत्येकमष्टोत्तरशतसंख्याकाभिः शेषेणेत्यादिव्रीहिचरु
श्रपणांतं कृत्वाऽऽज्यभागांते लिंगमर्चां वाईशानदिग्वेदिकायां वस्त्रास्तरे पीठे वा स्था
पितां अष्टकृत्वो मृदा संस्नाप्य मन्त्रावृत्त्या पंचवारं व्यंहूत्वा तत्सवितुरिति गायत्र्या गो
मूत्रेण गंधद्वारामिति गोमयेन आप्यायस्वेति क्षीरेण दधिक्राव्ण इति दध्ना घृतं
मिमिक्षिर इति घृतेनेति पंचगव्यैः पुनः आप्यायस्वेति क्षीरेण दधिक्राव्ण इति द
ध्ना तेजोसीति घृतेन मधुवाता इति मधुना आयं गौरिति शर्करयेति पंचामृतैश्चा
भिषिच्य अर्चायाः प्राच्याद्यष्टदिक्षु महीद्यौरित्यादिविधिनाष्टौ कलशान् वारि
पूर्णान् दूर्वासर्षपपंचपल्लवोपेतान् प्रतिष्ठाप्य गंधपुष्पादिसर्वौषधीः क्षिप्त्वा आ
पो हि ष्ठेति तिसृभिः हिरण्यवर्णा इति चतसृभिः पवमानः सुवर्जन इत्यनुवाकेन देव
स्य त्वेत्यादिभिर्मंत्रैः प्रत्येकमावृत्तैः प्रतिकलशोदकैरभिषिच्य वस्त्रगंधादिभि
रुपचारैर्नाममंत्रेणाभ्यर्च्य अग्नेः प्राच्यां सर्वतोभद्रेऽष्टदले वा मध्यभागस्थापि
घृतं मिमिक्षिर इति घृतेन ५ चतुर्दिक्षु कलशान् संस्थाप्य

Joint property of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

१ रक्षोहणमिति मंत्रेण स्रुक्स्रुवमार्जनं देवस्य ॰ कें कलशाज्येन एकैकया कुर्यात् चतुर्दिक्षु कलशान्
दक्षिणकरे बध्नीयात्

(2A)

तो भद्रपीठे अर्चामुपवेश्य तत्प्रागादिदिक्षु अष्टौ पिष्टमयान्दीपान् प्रज्वाल्य उत्तरतः एकं निद्रा
कलशं संस्थाप्य देवस्य दक्षिणपार्श्वे ४ कलशान् वारिपूर्णान् गंधाक्षतचूतपल्लवोप
शोभितान् अवस्थाप्य नेत्रे वाष्टो ४ उदङ्मुखस्तिष्ठन्। चित्रं देवानामिति मंत्रेण स्वर्ण
र्णशलाकया गंधेन नेत्रे उन्मील्य देवस्य तेजोसि मधुना च नेत्रांजनं विधाय दक्षिणस
व्ये देवनेत्रे मंत्राह्व स्यालिखेत्। आदर्शं भक्ष्यादि दर्शयेत्। प्रत्यृचं मादोप्रण वेदन्
पुरुषसूक्तं श्रावयित्वा तेनैव सूक्तेन पंचवर्णेन देवस्य नीराजनं कारयित्वा चित्रान्नं
बलिं दद्यात्। ततः सर्वतोभद्रदेवता आवाहयेत्। तत्र ब्राह्मपदे गोगोतमादिदेवता
आवाह्य तत्पार्श्वे नवग्रहान् तत्पार्श्वे ऐंद्र्यादि आवाह्य पूजयेत्। अर्चायां तत्तन्मंत्रेणा
वाह्य मंडलमध्ये वासुः प्रतिष्ठो भवेति तदग्रे स्थंडिले समेत्य समिदाज्यचरुतिलद्र
व्यैः मंडलदेवतानां नामभिः इंद्रादिशांतिं दुर्गादिभ्यो तथा पूर्वोक्तद्रव्यैः प्रत्येकमष्टोत्तरशत
संख्यया प्रतिष्ठितदेवतामंत्रेण जुहुयात्। एकैकद्रव्यहोमांते देवस्पृष्टेत्। आज्यहोमे
चोत्तरतः स्थापितकलशे संपातान् क्षिपेत्। स्विष्टकृदादि पूर्णाहुतिं कृत्वा होममंत्रो सि
ननिषेधो अग्निपुराणे १ स्वालचीति तिलाज्येन दशाहुतीर्जुहोति ३३ अनुक्रमेण शिरस्युरसि पादयोः सर्वांगेषु न्यस्य स्वौ
र। रत्नजे लोहजे लिंगे लक्षणोद्धरणं नहि। गंधाक्तेन स पुष्पेण चांकजे २ या २

ततः ५ शोधयेत् ...

(3)

१ देवं प्रार्थयेत्। आरोग्यादिसमृध्यर्थं यजमानस्य तेमया होमादिकं त्र्यंयत्सर्वं तत्राशात्वं क्षमस्व मे इति ततः अ॰
•वेलाची• माप्यां चौमासमीपभागस्य प्रतिष्ठाप्य देवं हृदि ध्यात्वा सितपुष्पपूर्णमंजलिं कृत्वा
२ निजहृत्कमले सर्वसाक्षिणमणीयांसं तेजोमयं ध्यात्वा तत्तेजो हृत्कमलान्नासा
मार्गेण करस्थपुष्पेषु निःसृतं विचिंत्य तत्पुष्पांजलिं स्वमस्तकांतं नीत्वा सुमुहूर्ते
तत्तन्मंत्रोच्चारणपूर्वकं प्रतिष्ठितपरमेश्वरे इति देवमूर्धनि पुष्पांजलिं क्षिपेत्। तत्ते
जो देवशरीरे ब्रह्मरंध्रद्वारा प्रविश्य ध्यायन्। ततः आलाहार्षमिति सूक्तेन तदस्तु मित्रावरुणा
गृहा वेद इत्यादि स्वशाखीय विधिना प्रतिष्ठितो भवेति च प्रतिष्ठाप्य प्राणवेन निरु
ध्य॥ प्राणप्रतिष्ठां कुर्यात्। तद्यथा। अस्य श्रीप्राणप्रतिष्ठामंत्रस्य। ब्रह्मविष्णुम
हेश्वरा ऋषयः। ऋग्यजुःसामान्यथर्वाणि छंदांसि। परा प्राणशक्तिर्देवता। आं बी
जं। ह्रीं शक्तिः। क्रों कीलकं। अस्यां प्राणप्रतिष्ठापने विनियोगः॥ ॐ आं ह्रीं क्रों।
अं यं रं लं वं शं षं सं हं क्षं अः हंसः सोहं देवस्य प्राण इह प्राणाः। ॐ आं ह्रीं ०हं देवस्य
जीव इह स्थितः। ॐ आं ह्रीं ०हं देवस्य सर्वेंद्रियाणि। वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्रा
णवाक्पाणिपादपायूपस्थानि इहागत्य सुखं चिरं तिष्ठंतु स्वाहा। इति देवस्य हृदि २

पाद्ये दूर्वाश्यामाकविष्णुक्रांतापद्मपत्रमिश्रं। इमा आपः शिवतमाः पूताः पूततमा मेध्या मेध्यतमा अमृता अमृत स्याहेति पाद्यं

रसाः पाद्यं स्नानं गृह्णा तां प्रतिगृह्णातु भगवान् लक्ष्म्यै नमः पाद्यं॥

हस्तं दद्याज्जपेत्। अस्यै प्राणाः प्रतिष्ठंतु अस्यै प्राणाः क्षरंतु च। अस्यै देवत्वमर्चायै
मामहेति च कश्चनेति ततः प्रणवेन संनिरुध्य जीवं ध्यात्वा ध्रुवाद्यौरिति त्र्यंजरत्वा कर्णे
गायत्र्या देवमंत्रं जप्त्वा पुरुषसूक्तेनोपस्थाय पादनाभिशिरःसु स्पृष्ट्वा इह वै धिद्द इति
त्रिर्जपेत्। ततो द्वादशवारं प्रणवं जपेदिति प्राणप्रतिष्ठां विधाय सुप्रसन्नो वरदो भवे
ति संप्रार्थ्य पुरुषसूक्तेन तत्तद्देवमंत्रेण वा सकृदील। अथ वैदिकपुराणतांत्रिकान्य
तमेन समुच्चितेन वा विधिना देवं पूजयेत्। तत्र स्नानोत्तरं पंचामृतैरभिषिंच्य संपा
तकलशोदकेन इमा आपः शिवतमा इत्यादिभिर्मंत्रैः शुद्धोदकेन च संस्नाप्य तत्तन्मू
लमंत्रैश्च वतेनैव सप्तकलशैः संस्नाप्य वस्त्रालंकारादीन् दीपांतानुपचारान्नि
वेद्य पुरुषाहारपर्याप्तं नानाविधिनैवेद्यं घृतशर्करोपाय संवा निवेद्य महानीराज
नं कृत्वा देवस्य पादयोः पुष्पांजलिं प्रक्षिप्य प्रार्थयेत्॥ कर्ता स्वागतं देव देवेश
मद्भाग्यात्त्वमिहागतः। प्राकृतं त्वं मद्दृष्ट्वा मां बालवत्परिपालय। धर्मार्थकाम
सिध्यर्थं स्थिरो भव शुभासनः। सान्निध्यं तु सदा देव स्वार्चायां परिकल्पय॥
आचमनीयं। एलालवंगकंकोलकर्पूरमिश्रं। इमा [illegible] आपः शि० आचमनीयार्थं जुष
स्नानं। रत्नपूतेन स्नानं। इमा आपः० अमृतरसाः स्नानीयार्थं जुषंतां प्रतिगृह्णातु भगवान्। महालक्ष्म्यै

(५)

-चलार्चा २

यावच्चंद्रश्चावनी सूर्यास्ति दुःखप्रतिघातिनः। तावत्वयात्र देवेश स्थेयं भक्तानुकंपया।
भगवन्देवदेवेश त्वं पिता सर्वदेहिनां। येन रूपेण भगवंस्त्वया व्याप्तं चराचरं। तेन रूपे
ण देवेश स्वार्चायां संनिधौ भवेति नमेत्। स यजमान आचार्याः शक्त्या दंडवन्नमस्कु
र्यात्।। ततः पुष्पांजलिं दत्वा देवस्य पंचांगन्यासं कृत्वा देवमनेकधा संप्रार्थ्य शरणा
गतो यं अस्य यजमानस्य कुले सर्वदा सानुग्रहदृष्टिर्भवेति पुनः पुष्पांजलिं दत्वा
पुनस्तस्मिंस्तम्भे वन्यासं कृत्वा देवपार्श्वे अष्टकलशोदकैः सार्चिगाचार्यः सकुटुं
बिनं यजमानं समुद्रज्येष्ठा इत्यादिभिः सूक्तैस्त्वेत्यादिभिश्चाभिषिंचेत्।। अथ य
जमानो गवादिदक्षिणामाचार्याय अन्येभ्यश्च भूयसीं दक्षिणां दत्वा यथाशक्ति
ब्राह्मणान्भोजयित्वा कर्मेश्वरार्पणं कुर्यात्।। इत्यनंतदेवकृतराजधर्मकौस्तुभे नं
बौधायनोक्तं संक्षिप्तचलार्चाप्रतिष्ठाविधिः।। खरे इत्युपनाम्ना गंगाधरेणालि
खितं।। शके १७२२ रौद्रनाम संवत्सरे ज्येष्ठ वा। १३ भृगुवारे।। रुइयामळे। स्थापनं ३
यस्य देवस्य क्रियते पद्मलोचन।। कृत्वा तस्य ततं हैमी मंडे संप्रपूजयेदिति स्थि
ले

(3A)

दिव्यो बधिमद्दानेन कपिकोटिरनेकशः ॥ हनूमते नीयते नमस्तस्मै परात्मने ॥ इति हनुमतेः ॥ मंत्रः ॥ १
र प्रतिष्ठायामुक्तं ॥ ॥ तत्र प्रतिमा लक्षणं ॥ अंगुष्ठपर्वादारभ्य वितस्तीर्यावदे
व हि ॥ गृहेषु प्रतिमाः कार्या पूजनार्थं हि सूरिभिः ॥ कांचनी राजती तांम्री पार्थिवी शै
ल ज्ञा तथा ॥ दारवी लेख्यगा चेति मूर्तिस्थानानि सप्त वै ॥ ६ ॥

चेळाची साहित्य

पुण्याहवाचन साहित्य | १ पंचपल्लव | पंचामृत | होमद्रव्ये | ८ पिष्टदीप | १ कळश | १ वाति ७०
श्वेतसर्षप | पंचगव्य | १ पलाशसमिधा | २ स्कंध वर्णाश | १ पाट
तांदूळ | १ सर्वौषधी | सप्तमृत्तिका | इध्मा | लाकया | १ नारळ
कळश | १ संखिळस | गोदान | आज्य | १ आदर्श | १ कांडवाति ३०
खोबऱ्याच्या वाट्या | मृत्तिका | १ उदबत्त्या | चरु | १ नैवेद्यास | १ कांकडा
सुपाऱ्या | १ गोमय | १ लुगड्याचा | तिळ | पक्वान्न | १ कापुर
पानेविड्याची | १ रांगोळी | तीनिराजन | दर्भ | १ पंचार्ति | १ बुका
द्रोणपत्रावळी | १ रवाकी | १ समयीतेल | दूर्वा | १ चित्रान्नब | १ गुलाल
गूळ | १ फळे | वातसुधा | | लिंहान | १ उडीद
खोबर | | | | १ वस्त्र ६ | १ सुवर्णशलाका
| | | | | १ नापष्याचिवस्त्रे

इमे गंधाः शुभा दिव्याः सर्वगंधैरलंकृताः। पूता ब्रह्मपवित्रेण पूताः सूर्यस्य रश्मि
भिः। गंधं० इमे माल्याः शुभा दिव्याः सर्वमाल्यैरलंकृताः। पूता ब्रह्मपावित्रेण पूताः
सूर्यस्य रश्मिभिः। पुष्पं। वनस्पति धूपं० ज्योतिः शुक्रं च तेजश्च देवानां सततं प्रियं। भास्क
रं सर्वलोकानां दीपोयं प्रतिगृह्यतां। दीपं० पवित्रं ते विततमिति मंत्रेण नैवेद्यं संप्रोक्ष्य देवा
यनिवेद्याचमनीयं दत्वा फलतांबूलं दक्षिणा महानीराजनं कृत्वा पुष्पांजलिं समर्पयेत्।
मंडलदेवतानुक्रमः। मध्ये ब्रह्मणे नमः ब्रह्माणमावाहयामि। उत्तरे सोमाय नमः। सो
म आ० ईशानाय० इंद्राय० अग्नये० यमाय० निर्ऋतये० वरुणाय० वायवे० वायुसोम
मध्ये अष्टवसुभ्यो० एकादशरुद्रेभ्यो न० द्वादशादित्येभ्यो० आश्विभ्यां न० विश्वेभ्यो
देवेभ्यो नमः। सप्तयक्षेभ्यो न० सर्पेभ्यो न० गंधर्वाप्सरोभ्यो नमः। ब्रह्मसोममध्ये स्कं
दाय० नंदीश्वराय० शूलाय० महाकालाय० ब्रह्मेशानयोर्मध्ये दक्षाय० ब्रह्मेंद्रयोर्मध्ये
दुर्गायै न० विष्णवे० ब्रह्माग्न्योर्मध्ये स्वधायै० मृत्युरोगेभ्यो० गणपतये० अद्भ्यो न० मरुद्भ्यो
नमः। ब्रह्मपादमूले पृथिव्यै० गंगादिनदीभ्यो० सप्तसागरेभ्यो० तदुपरि मेरवे न० गदायै० त्रि
शूलाय० वज्राय० शक्तये० दंडाय० खड्गाय० पाशाय० अंकुशाय० गौतमाय० भरद्वाजाय० वि
श्वामित्राय० कश्यपाय० जमदग्नये० वसिष्ठाय० अत्रये० अरुंधत्यै० ऐंद्र्यै० कौमार्यै० ब्राह्म्यै० वारा

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com